सत्त्व-बल-रूप-गर्व्व-शौर्य्य-युक्तं माल्यानुलेपनं हास्यप्रियमतिवाक्करणं प्रायः शुक्लैकादश्यां सप्तम्याञ्च यक्षाः,स्वाध्याय-तपोनियमोपवासव्रतचर्य्या-देव-यति-गुरु-पूजारतिं भ्रष्टशौचं ब्राह्मणमब्राह्मणं वा ब्रह्मवादिनं शूरमानिनं देवतागार-सलिल-क्रीड़नरतिं प्रायः शुक्लपञ्चम्यां पूर्णचन्द्रदर्शने च ब्रह्मराक्षसाः, रक्षःपिशाचास्तु हीनसत्त्व-पिशुन-स्त्रैण-लुब्धं प्रायो द्वितीयातृतीयाष्टमीषु पुरुषं छिद्रमवेक्ष्याभिधर्षयन्तीत्यपरिसंख्येयानां ग्रहाणामाविष्कृततमा ह्यष्टावेते व्याख्याताः” ॥

अथ ये असाध्यास्तेषां लक्षणानि यथा।

“सर्व्वेष्वपि तु खल्वेष यो हस्तावुद्म्य रोष-संरम्भो निःसंज्ञमन्येष्वात्मनि वा पातयेत् सह्यसाध्यो ज्ञेयस्तथा साश्रुनेत्रो मेढ्रप्रवृत्तरक्तः क्षतजिह्वः प्रस्रुतनासिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपाणिः सततं विकूजन् दुर्व्वर्णस्तृषार्त्तः पूतिगन्धिश्च हिंसार्थी उन्मत्तो ज्ञेयस्तं परिवर्जयेत्। रत्यर्च्चनाकामोन्मादिनौ तु भिषगभिप्रायाचाराभ्यां बुद्धा तदङ्गोपहारबलिश्रमेण मन्त्रभैषज्यविधिनोपक्रमेत्” ॥

अस्य चिकित्सा यथा।

“लशुनानां शतं त्रिंशदभयात्र्यूषणात्पलम्।
गवां चर्म्ममसी प्रस्थो द्व्याढ़कं क्षीरमूत्रयोः ॥
पुराणसर्पिषः प्रस्थमेभिः सिद्धं प्रयोजयेत्।
हिङ्गुचूर्णं पलं शीते दत्त्वा च मधुमाणिकाम् ॥
तद्दोषागन्तुसम्भूतानुन्मादान् विषमज्वरान्।
अपस्मारांश्च हन्त्याशु पानाभ्यञ्जननावनैः” ॥

लशुनाद्यं घृतम् ॥*॥

“विशेषतः पुराणञ्च घृतं तं पाययेद्भिषक्।
त्रिदोषघ्नं पवित्रत्वाद्विशेषाद्ग्रहमोक्षणम् ॥
गुणकर्म्माधिकं स्थानादास्वादात् कटुतिक्तकम्।
उग्रगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् ॥
लाक्षारसनिभं शीतं तद्धि सर्व्वग्रहापहम्।
मेध्यं विरेचेष्वग्र्यं प्रपुराणमतः परम् ॥
नासाध्यं नाम तस्यास्ति यत्स्यात् वर्षशतं स्थितम्।
दृष्टं स्पृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम् ॥
अपस्मारग्रहोन्मादवतां शस्तं विशेषतः” ॥
“एतैरौषधवर्गैर्व्वा विधेयत्वं स गच्छति।
अञ्जनोन्मादनालेपान्नावनादींश्च योजयेत् ॥
शिरीषो मधुकं हिङ्गु लशुनं तगरं वचाम्।
कुष्ठञ्च वस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम्” ॥

इति नस्याञ्जनम् ॥*॥

“प्रक्षेके पीनसे गन्धैर्धूमवर्त्तिं कृतां पिबेत्।
वैरेचनिकधूमोक्तैः श्वेताद्यैर्व्वासहिङ्गुभिः” ॥

इति धूमपानम् ॥*॥ [शिराम्।

“शङ्खके शान्तसन्धौ वा मोक्षयेज्ज्ञो भिषक्
उन्मादे विषमे चैव ज्वरेऽपस्मार एव च” ॥
“कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्।
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत्” ॥
“देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य तु बुद्धिमान्।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च ॥
सर्पिःपानादि तस्येह मृदुभैषज्यमाचरेत्।
पूजां बल्युपहारांश्च मन्त्राञ्जनविधींस्तथा ॥
शान्तिकर्म्मेष्टिहोमांश्च जपस्वस्त्ययनानि च।
वेदोक्तान् नियमांश्चापि प्रायश्चित्तानि चाचरेत् ॥
भूतानामधिपं देवमीश्वरं जगतः प्रभुम्।
पूजयन् प्रयतो नित्यं जयत्युन्मादजं भयम् ॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये।
तेषां पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते” ॥

इति च चरके चिकित्सास्थाने चतुर्द्दशोऽध्यायः ॥

अस्य विशिष्टपूर्व्वरूपं यथा।

“मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम् ॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति” ॥

वातजादिभेदेन रूपाणि यथा ॥

“रूक्षच्छविःपरुषवाक् धमनीततो वा
श्वासातुरः कृशतनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात् ॥ १ ॥
तृट्स्वेददाहबहुलो बहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च ॥ २ ॥
छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रकारः।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात् ॥ ३ ॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्” ॥ ४ ॥
अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि।

अस्य चिकित्सा यथा।

“स्निग्धं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनैः ॥
विविधैरवपीड़ैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत् ॥
सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा ॥
दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः ॥
भीषयेत् सततं पाशैः कशाभिर्वाथ ताड़येत्।
यन्त्रयित्वा सुषुप्तं वा त्रासयेत्तं तृणाग्निना ॥
प्रतुदेद्दारयेच्चैनं मर्म्माघातं विवर्ज्जयेत्।
सापिधाने जरत्कूपे सततं वा निवासयेत्” ॥
“वर्हिष्ठकुष्ठमञ्जिष्ठाकटुकैलानिशाङ्गयैः।
तेनेदं त्रिफलाहिङ्गुवाजिगन्धामरद्रुमैः ॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम् ॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम्।
ख्यातं फलघृतं स्त्रीणां बन्ध्यानाञ्चाशु गर्भदम्” ॥

इति फलघृतम् ॥ * ॥

“उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत्।
अपस्मारक्रियाश्चापि ग्रहोद्दिष्टाश्च कारयेत्।
शान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत् ॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक्।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम् ॥
मृदुपूर्व्वं मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत्।
विषजे मृदुपूर्व्वाञ्च विषघ्नीं कारयेत् क्रियाम्” ॥

इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्यायः ॥*॥

“तपांसि तीव्राणि तथैव दानं
व्रतानि धर्म्मो नियमश्च सत्यम्।
गुणास्तथाष्टावपि तेषु नित्याः
व्यस्ताः समस्ताश्च यथाप्रभावम् ॥
न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः ॥
तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्याः।
असृग्वसामांसभुजः सुभीमाः
निशाविहाराश्च तमाविशन्ति” ॥
“निशाचराणां तेषां हि ये देवगणसंस्थिताः।
ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः ॥
देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये।
देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते च देववत् ॥
स्वामिशीलक्रियाचाराः क्रमएव सुरादिषु।
नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः ॥
सत्यत्वादप्रवृत्तेषु वृत्तिस्तेषां गणैः कृता।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः ॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।
ग्रहसंज्ञाभिभूतानि यस्माद्वेत्त्यनया भिषक् ॥
विद्यया भूतविद्यात्वमतएव निरुच्यते।
तेषां शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः ॥
जप्यैः सनियमैर्होमैरारभेत चिकित्सितम्।
रक्तानि गन्धमाल्यानि वीजानि मधुसर्पिषाम् ॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते।
वस्त्राणि मद्यमांसानि क्षीराणि रुधिराणि च ॥
यानि तेषां यथेष्टानि तानि तेभ्यः प्रदापयेत्।
हिनस्ति मनुजान् येषु प्रायशो दिवसेषु च ॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।
देवग्रहे देवगृहे कृत्वाग्निं प्राशयेद्बलिम् ॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससम्भृतम्।
असुराय यथाकालं विदध्याच्चत्वरादिषु ॥
चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा।
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत् ॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्” ॥
“नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः।
हरिद्रे च कृतावर्त्तिः पूर्व्ववन्नयनाञ्जनम्” ॥
“न चायत्तं प्रयुञ्जीत प्रयोगं देवताग्रहे।
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत् ॥
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः।
हिताहितविधानञ्च नित्यमेव समाचरेत् ॥
ततः प्राप्स्यति सिद्धिञ्च यशश्च विपुलं भिषक्” ॥